॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૧૨. દ્વાદશઃ સર્ગઃ

અત્રાનંતસ્વાંતવેદાંતિસિંહે મુખ્યવ્યાખ્યાનિસ્વને જૃંભમાણે ।
સદ્યો માયદ્વાદિદંતીંદ્રભીમે ભેજે ક્ષોભો માયિગોમાયુયૂથૈઃ ॥ ૧૨.૧ ॥

સંભૂયામી ચોળજદ્વીપિપુર્યોઃ પાર્શ્વે પાપા મંત્રયામાસુરુગ્રાઃ ।
સાસૂયા ભૂભૂષણે વાયુદેવે મૂઢા યદ્વદ ધાર્તરાષ્ટ્રાંતિકે પ્રાક ॥ ૧૨.૨ ॥

સન્માત્સર્યં બદ્ધમૂયેઽશુભાનાં વાચાઽલોલં કોપિ ગાં ધારકસ્ય ।
મધ્યે તેષાં નીચનીત્યા સમાનો વાચાલોઽલં કોઽપિ ગાંધારકસ્ય ॥ ૧૨.૩ ॥

એકં તત્વં વષ્ટિ માયામયીયં વાક્યૈઃ પ્રાચ્યૈરપ્યવાચ્યં વિધત્તે ।
પૂર્વાઽપૂર્વા હંત દૌર્ઘટ્યભૂષા ચિત્રંચિત્રં દર્શનાચાર્યનીતિઃ ॥ ૧૨.૪ ॥

મર્ત્યામર્ત્યામર્ત્યવિદ્વિટ્પુરોગં વિશ્વં દૃશ્યં વિપ્રચંડાલપૂર્વમ ।
ભેદાપેતં ભેદિમાનૈઃ સમાનૈઃ સાધીયઃ કઃ સાધયેત તામલબ્ધ્વા ॥ ૧૨.૫ ॥

સત્યં સત્યં વ્યાવહાર્યં વિધત્તે સર્વં મોહે સર્વનિર્વાહિણી સા ।
જ્ઞાને જાતે દગ્ધવસ્ત્રપ્રતીતં પકવે તસ્મિંસ્તપ્તલોહાત્તવાર્વત ॥ ૧૨.૬ ॥

જ્ઞાનિશ્રેષ્ઠશ્રેષ્ઠ વિજ્ઞાનિવર્ગે નૈર્ગુણ્યસ્થે સાંપ્રતં નાથભૂતાઃ ।
આક્રંદં મે હંત શૃણ્વંતુ સોઽયં હાહા માયાવાદ ઉત્સાદમેતિ ॥ ૧૨.૭ ॥

ભ્રષ્ટા ભાટ્ટા ન પ્રભાકૃત્પ્રભાઽભૂત ત્રસ્તા માહાયાનિકાદ્યાશ્ચ યત્ર ।
દુર્ગં માયાવાદસત્રં દિધક્ષુઃ નોપેક્ષ્યા નસ્તત્ત્વવાદાગ્નિજિહ્વા ॥ ૧૨.૮ ॥

યં યં પ્રાપદ ભૂરિચિત્તઃ પ્રદેશં તસ્માત્તસ્માદાગતેરંતરાયઃ ।
પ્રત્યજ્ઞાયિ વ્યક્તમાર્યેણ સોઽપિ પ્રાપ્નોત પાર્શ્વં હિ વયં ભાગ્યહીનાઃ ॥
૧૨.૯ ॥

પ્રશ્નઃ પૃષ્ટઃ ખંડ્યતે તેન નૂનં યુક્તાં યુક્તિં વક્તિ યાસાવખંડ્યામ ।
વાદિવ્રાતં લજ્જયેન્નો વિશેષાદ આક્ષેપ્તેતિ શ્રૂયતે કિં નુ કુર્મઃ ॥ ૧૨.૧૦ ॥

પ્રાચ્યં શાસ્ત્રં યત સપાદં તુ લક્ષં વાક્યેનૈકેનાક્ષિપદ્ધર્ષ તીર્થઃ ।
ઈત્થં પાંથૈર્વર્ણીતં શૃણ્વતઃ પ્રાગ યુષ્માન પ્રાપદ દૂયમાનં મનો મે ॥ ૧૨.૧૧
॥

વેદવ્યાસો ન્વેષ વેદો નુ મૂર્તો દિવ્યા મૂર્તિર્યસ્ય સા સુસ્મિતસ્ય ।
તદ્દ્રશ્ટૃણાં ચેતિ વાણી કૃપાણી નૂનં માયાપક્ષમૂલં છિનત્તિ ॥ ૧૨.૧૨ ॥

અક્લિષ્ટં તત્સૂત્રભાષ્યં બલીયો માનોપેતં કા ક્ષતિર્નસ્તથા ચેત ।
આસ્માકાઃ કેઽપ્યેવમુક્ત્વા વિલજ્જાઃ લજ્જાસિંધૌ દુસ્સહેઽમજ્જયન્નઃ ॥
૧૨.૧૩ ॥

તસ્ય વ્યાપ્તૈઃ શિષ્યજાલૈસ્તુ ગૌણૈઃ સંસત્સિંધૌ શંખચક્રાદિભૃદ્ભિઃ ।
મા ગૃહ્ણેરન વિશ્વસત્ત્વાંતરાણિ ક્ષેમાપ્ત્યૈ નસ્તત્ર નીતિં વિધત્ત ॥ ૧૨.૧૪ ॥

ગૌણૈસ્તર્કૈર્ગૌણવાક્યાભિગુપ્તૈઃ ગૌણીં બુદ્ધિં વર્ધયંતે નૃણાં તે ।
હંસાનાં નો વાગ્વિઘાતપ્રવીણાઃ સિંધું ભૂયોવારિવર્ષૈરિવાબ્દાઃ ॥ ૧૨.૧૫ ॥

બાહુલ્યેન હ્યેતદુકત્વા ખલુ દ્રાગ એતે વિશ્વં પ્રાપ્નુવંતિ પ્રકામમ ।
અસ્મિન્નસ્મદ્દર્શનાપાયકાલે યદ્વલ્લોકાપાયકાલે લયાપઃ ॥ ૧૨.૧૬ ॥

આકર્ણ્યેત્થં તસ્ય વાણીમથાન્યો માની તેષાં માનિનાં ચિત્તવેત્તા ।
સ્વાનાં ચેતો નંદયન મંદચેતાઃ ધૃષ્ટામુચ્ચૈર્વાચમાચષ્ટ કષ્ટઃ ॥ ૧૨.૧૭ ॥

તેજઃ શંકામાત્રતો યદ વિલીનં ધિગ ભીરૂણાં માનસં માનહીનમ ।
એકાંતેન પ્રાપ્તતેજોવિલીનં સ્થેયો યસ્માદ ભાતિ હૈયંગવીનમ ॥ ૧૨.૧૮ ॥

યેષાં વિદ્યાં શાંકરી શંકરી નો દેવાદીનાં બાધ્યતાં સાધયંતી ।
શૌક્રીવાલં લજ્જયેદ દેવપૂજ્યં તેષામેષાં સન્નિધૌ કો વિષાદઃ ॥ ૧૨.૧૯ ॥

યદ્યદ્વૈતં કર્કશૈર્ગૌણતર્કૈઃ રુદ્ધં સાધ્યં નૈવ ભાત્યસ્તુ તાવત ।
ષટ્કર્મજ્ઞૈર્દિવ્યમંત્રૌષધાઢ્યૈઃ એતૈર્ગુપ્તાન નો વિજેતા હિ કશ્ચિત ॥ ૧૨.૨૦
॥

યદ્યપ્યેવં ન હ્યુપેક્ષ્યો વિપક્ષઃ કિંતુ પ્રાપ્તો નાધુનાऽऽકંદકાલઃ ।
અપ્યદ્વંદ્વસ્વાત્મબોધપ્રતીતૈઃ આચાર્યૈર્યચ્છંક્યતે શંકરાદ્યૈઃ ॥ ૧૨.૨૧ ॥

પારંપર્યેણાऽગતં તત્ત્વશાસ્ત્રં હંતોત્સન્નં નૂતનેનેત્યુદીર્ય ।
તેષાં દોષા વર્ણનીયા વિદગ્ધૈઃ સંતોऽસંતો વાऽપિ મધ્યસ્થલોકે ॥ ૧૨.૨૨ ॥

સ્વાભિપ્રાયો બ્રહ્મવત સ્યાદવાચ્યો માયાશક્ત્યા સર્વનિર્વાહસિદ્ધિઃ ।
ઈત્થં નીત્યા શાસ્ત્રનીત્યેવ બાધ્યઃ સર્વો લોકઃ સ્વાત્મનો યઃ પરઃ સ્યાત ॥ ૧૨.૨૩ ॥

ગ્રામેગ્રામે વાર્યતાં માનનૈષાં પૂર્વપૂર્વં સામપૂર્વૈરુપાયૈઃ ।
સંપ્રાપ્તાનાં માનભંગાય કાર્યં ગ્રંથાકર્ષાદ્યુદ્યતૈરસ્મદીયૈઃ ॥ ૧૨.૨૪ ॥

ઈત્યાદ્યેતે કાર્યમાલોચ્ય કાલે
ચક્રુર્વક્રાશ્ચક્રિભક્તપ્રતીપમ ।
યોગ્યા મંક્તું તેऽન્યથા સ્યુઃ કથં વા
દુઃખોગ્રાંભસ્યંધતામિસ્રસિંધૌ ॥ ૧૨.૨૫ ॥

વ્રત્યાકારંવાસુદેવદ્વિષં તે પ્રાજ્ઞં મન્યં પુંડરીકાભિધાનમ ।
વાદવ્યાજાક્ષેપકામાઃ કુમંત્રાત ચક્રુર્યત્તં રૂપ્યપીઠાલયેऽમી ॥ ૧૨.૨૬ ॥

યદ્વત સિંહં ગ્રામસિંહોऽશુચીચ્છો હંસં કાકો યદ્વદેવૈકદૃષ્ટિઃ ।

યદ્વન્માયી ભૂરિમાયસ્તરક્ષું તદ્વદ વિદ્વદ્વર્યમાહ્વાસ્ત મૂઢઃ ॥ ૧૨.૨૭ ॥

અપ્યલ્પોઽસૌ ન હ્યુપેક્ષાંબભૂવે લોલાત્મેવાદક્ષપક્ષઃ પતંગઃ ।
મધ્વેનાહો દુસ્તરેણ સ્વભાવાત તેજોરાજીરાજિતેનાગ્નિનેવ ॥ ૧૨.૨૮ ॥

માનૈર્માન્યૈર્ભાસમાનોઽસમાનૈઃ આક્ષિપ્યૈનં સ્વં મતં સાધયિત્વા ।
પ્રીત્યૈ વિષ્ણોરુત્તમપ્રીતિતીર્થો વેદવ્યાખ્યાં વેદવેદી ચકાર ॥ ૧૨.૨૯ ॥

આમ્નાયં યે પેઠુરામ્નાયપૂર્વં પ્રાપ્તા વિપ્રાસ્તત્ર કૌતૂહલેન ।
પર્યાસીનાસ્તાવદાચાર્યવર્યં પ્રેક્ષ્યં પ્રેક્ષાંચક્રિરેઽનેકસંખ્યાઃ ।૧૨.૩૦ ॥

ઉક્તાંગેભ્યઃ કાદિકાન વ્યંજયંતં તત્તન્માત્રાવ્યંજનાદૌ પ્રવીણમ ।
તિસ્રોઽવસ્થાસ્તદ્ગુણૈર્ભાવયંતં દેવા દૃષ્ટ્વા હ્યસ્મરન દેવદેવમ ॥ ૧૨.૩૧ ॥

આદૌ હ્રસ્વત્વેન વત્સાનુસૃત્યાં માત્રાપાદૌ વર્તયન દૃશ્યમાનઃ ।
કુર્વન્નન્યાશ્ચાગ્ર્યરૂપા વિવૃત્તીઃ ગોવિંદશ્રીરાસ ગોવિંદભક્તઃ ॥ ૧૨.૩૨ ॥

માંગલ્યાંગવ્યક્તભાવા ત્રિલોકીં રંગારૂઢા વિસ્મયં પ્રાપયંતી ।
કૃષ્ણેવાન્યા માન્યવિન્યાસપાદા રેજે માધ્વી સુસ્વરા વેદવાણી ॥ ૧૨.૩૩
॥

ગાંભીર્યાધૈર્યુક્તમૌદાર્યકાર્યૈઃ
નાનાનાદશ્લાધ્યમુચ્ચારણં તત ।

શીક્ષાશિક્ષાલક્ષણાનાં હિ લક્ષ્યં
માન્યં મન્યે ધન્યબુદ્ધેરતુલ્યમ ॥ ૧૨.૩૪ ॥

કાલ્પીઃ કલ પ્તીર્વ્યંજયચન છાંદસીશ્ચ વ્યકતં શાબ્દં શાસ્ત્રમુદ્ધાવ્ય ભૂયઃ ।
સ વ્યાચખ્યાવુકતનૈરુકતમાર્ગો જ્યાચાન જ્યોતિર્વૈદિનાં વેદમિત્થમ ॥
૧૨.૩૫ ॥

શ્રૌતે વ્યાખ્યોચ્ચારણે ચારુણી તે માદૃગ્દેહી વર્ણયેદસ્ય કો નુ ।
વાગીશાનૈર્વાગ્વિહંગેંદ્રજીવૈઃ ભૂર્યાશ્ચર્યૈર્વર્ણિતે ચે પ્રણમ્ય ॥ ૧૨.૩૬ ॥

છંદસ્સાર્થં સાર્થમત્રામુનેત્થં પ્રોકતં શ્રુત્વા બ્રાહ્મણા બ્રહ્મણેવ ।
સર્વે સૌમ્યા જિષ્ણુજિજ્ઞાસયાઽમી પ્રાપ્ય પ્રોચુશ્ચિત્રકાયાભિધાનમ ॥
૧૨.૩૭ ॥

પ્રાજ્યપ્રજ્ઞઃ પ્રાજ્યયા પ્રજ્ઞયાઽસૌ હંતાવોચન્મંત્રવર્ણાભિધેયમ ।
તત્પ્રત્યર્થી પ્રાર્થ્યતે વકતુમેતત પ્રાજ્ઞાસ્માભિઃ શ્રોતુકામૈર્ભવાંશ્ચ ॥ ૧૨.૩૮ ॥

ઈત્યુકતસ્તૈરેષ વિસ્તારિબુદ્ધેઃ પ્રાપ્તું સામ્યં સંપ્રવૃત્તો દુરાત્મા ।
હાસ્યોઽત્રાભૂદ વાસુદેવપ્રભાર્થી યદ્વત પૂર્વં પૌંડ્રકો વાસુદેવઃ ॥ ૧૨.૩૯ ॥

આડાદેશાદુત્તરં રાદિશબ્દં શ્રુત્વા નારેત્યુકતવંતં પદં તમ ।
વ્યાખ્યાલૌલ્યાદૈતરેયાદિસૂકતે પૃથ્વીદેવા નિંદનીયં નિનિંદુઃ ॥ ૧૨.૪૦ ॥

શાર્દૂલાખ્યાં પ્રાપ્ય સંભાવિતઃ પ્રાગ લોકે ધૂર્તો માચિગોમાચુરેષઃ ।
વાદિદ્વીપિધ્વંસિનં મધ્વસિંહં પ્રાપ્તો હીત્થં શબ્દશેષો બભૂવ ॥ ૧૨.૪૧ ॥

કૃષ્ણાભીષ્ટા શાસ્ત્રવિસ્પષ્ટ સંજ્ઞા યા સ્વીયા શ્રીઃ પાલિતા સદ્વિજેન ।
પદ્માખ્યાસત્સૈંધવેનાઽહૃતાં તાં શુશ્રાવાગ્ર્યાનંદતીર્થાખ્યપાર્થઃ ॥ ૧૨.૪૨ ॥

તૂર્ણં તીર્ણાદભ્રમાર્ગોઽથ સાર્યઃ સંપ્રાપ્તોઽસૌ ગોગણૈર્ભીષયિત્વા ।
સંયમ્યાંતર્યંતૃકામેન હાસ્યં સંપ્રાપ્તશ્રીર્નિર્જિતં તં જહાસ ॥ ૧૨.૪૩ ॥

દુષ્ટાત્માઽસૌ ભદ્રમેકાકિનં યઃ ક્ષેપ્તું હેતુઃ સૌખ્યદાખ્યં બભૂવ ।
હર્યંશોઽયં તં ન ચક્ષામ ભૂયઃ તોકે સન્ને સૂકરં કેસરીવ ॥ ૧૨.૪૪ ॥

તસ્ય ત્રાસાત પૃષ્ઠતસ્તિષ્ઠતોઽભૂત ક્ષેમાપેક્ષી યો જનઃ પ્રાગ જિતોઽપિ ।
મધ્યેઽન્યેષાં ગોતતીસ્તત્પ્રયુક્તાઃ સોઽઘજ્જિષ્ણુઃ પંચષૈર્ગોવિશેષૈઃ ॥
૧૨.૪૫ ॥

વિષ્ણોર્ભૂયઃ શોભયદ્ભિઃ પદાંતં પારંપર્યેણેર્યમાણૈરવાર્યૈઃ ।
ગોવ્રાતૈસ્તં દારયિત્વા ન્યગૃહ્ણાત કંજાખ્યાનં સિંધુપં મધ્વપાર્થઃ ॥ ૧૨.૪૬ ॥

આસ્તામાસ્તામેષ વો વિશ્વમોષો રેરે માયાવાદિચોરા દ્રવેત ।
દ્રષ્ટાદ્રષ્ટા નિગ્રહીતા ધ્રુવં વઃ પ્રાપ્તઃ કાલો દ્રાગ ગુહાંતં પ્રવેષ્ટુમ ॥ ૧૨.૪૭
॥

તેજો વિદ્વચ્ચક્રચંદ્રસ્ય લીનં વિધ્વસ્તાઽલં વાદિનક્ષત્રલક્ષ્મીઃ ।
વિશ્વવ્યાપ્તં યત તુ તદ્દીપ્તિમૂલં યુષ્મત્પ્રેષ્ઠં તન્નિરસ્તં તમશ્ચ ॥ ૧૨.૪૮ ॥

પૂર્વાશામાપૂર્ય વિશ્વપ્રકાશી ગોસંદોહૈઃ સપ્તવિદ્યાખ્યવાહઃ ।
યુષ્માભિઃ કિં નૈક્ષિ દેદીપ્યતેઽસૌ દેવઃ સાક્ષાત સર્વવિત્સર્વદીપઃ ॥ ૧૨.૪૯
॥

સર્વાધારં બ્રહ્મસંજ્ઞં વિહાયો રમ્યાકારં શારદેંદીવરાભમ ।
સન્નિર્ણીતં ગુણ્યલં શબ્દભેદૈઃ મધ્વાદિત્યં સંશ્રિતં કોઽપિધત્તે ॥ ૧૨.૫૦ ॥

વિધાવતવિધાવત ત્વરિતમત્રિવાદાસુરા-
અદભ્રધિષણાભિધો નરહરિર્હિ જાજ્વલ્યતે ।
સ યુક્તિનખરૈઃ ખરૈર્મુખરમૂર્ખદુઃખાંકુરૈઃ વિદારયતિ
દારુણપ્રવચનપ્રણાદોઽપ્રિયાન ॥ ૧૨.૫૧ ॥

ધત્તે રૂપાણ્યનંતાન્યપિ ભુવનપતે ર્યો હૃદાઽપ્યેક પક્ષો દક્ષઃ
સદ્ભ્યોઽખિલેભ્યોઽપ્યમૃતમિહ દદૌ કેવલં યો ન માત્રે ।
પક્ષિશ્રેષ્ઠોઽપરઃ સન્નમિતમતિપદોઽસંપદે સ્યાદયં વો મા

દર્પં માયિસર્પા ભજતભજત તાસ્તા ગુહા દ્રાગ દ્વિજિહ્વાઃ ॥ ૧૨.૫૨ ॥

વેદવ્રાતસુદર્શનઃ પરિલસત્તર્કાખ્યશંખધ્વનિઃ

વિભ્રાજિષ્ણુપુરાણ સંહતિગદઃ શ્લોકૌઘશાર્ઙ્ગાન્વિતઃ ।
સત્સૂત્રેષ્વિતિહાસનંદકચણો મધ્વાખ્યનારાયણઃ
પ્રાપ્તો વો નિજિઘૃક્ષયા દ્રવત હે માયાવિદેવદ્વિષઃ ॥ ૧૨.૫૩ ॥

ઈતિ નિગદતિ માયાવાદિવિદ્વેષ વેષે
શુભજનનિકરે સ્વારામતોઽસ્માત પ્રયાતઃ।
ન્યવસદમરધિષ્ણ્યે પ્રાગ્રવાટાભિધાને
ગુરુમતિરભિનંદન દેવમાનંદમૂર્તિમ ॥ ૧૨.૫૪ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે દ્વાદશઃ સર્ગઃ ॥

www.yousigma.com